वरस्तस्य फलञ्च मधुरं मनाक्” भावप्र० । “बिल्वार्क-खदिराकीर्णं कपित्थधवसङ्कुलम्” भा० आ० ६९ अ० । “मा विद्या च हरेः प्रोक्ता तस्या ईशो यतो भवान् । तस्मान्माधवनामासि धवः स्वामीति शब्दितः” हरिवं० २७९ अ० । भावे अप् । ६कम्पने ७विधूनने च पु० ।

**धवनि** स्त्री धू—करणे अनि । अनले पञ्चस्वरानि० ।

**धवल** पु० धाव—इण्. कल वा०ह्रस्वः धवं कम्पं लाति ला—क वा । “धवलः १सिन्दूरे २सिते । ३महोक्षे चाथ धवली ४सौरभ्यां समुदाहृता” विश्वः । सौरभ्यामेव गौरा०ङीष् । श्वेतवर्णयुक्ते त्रि० अमरः अत्रार्थे स्त्रियां टाप् । “सीतेव निशा शशाङ्कधवला” उज्ज्वल० । ५निर्मले त्रि० त्रिका० । “क्रियते धवलः खलूत्कैर्धवलैरेव सितेतरैरघः” माघः । ६धवट्ठत्ते ७चीनकर्पूरे स्त्री । ८श्वेतमरिचे न० राजनि० । ९रागभेदे स च भरतमते हिन्दोलरागस्य अष्टमः पुत्रः सङ्गीतशास्त्रम् । १०शालिभेदे “धवलः पाण्डुरस्निग्धो रक्तपित्तहरो हिमः । रसे पाके च मधुरः संग्राही वातशान्तिकृत्” भावप्र० । ११छन्दोभेदे तल्लक्षणं यथा “द्विजवर ! गणयुगमनगणमनयुगलकं विमलवलयमपि च कलय सकलजनसुखम् । फणिपतिवरभणितममलमिह हितं विमलकविसुहृदिव ललितमिति भुवि विदितम्” ।

**धवलगिरि** पु० कर्म० । स्वनामख्याते पर्वतभेदे ।

**धवलपक्ष** पुंस्त्री धवलौ पक्षौ यस्य । हंसे राजनि० स्त्रियां जातित्वात् ङीष् । “धवलपक्षविहङ्गमकूजितैः” माघः । कर्मधा० १चान्द्रमासघटके पञ्चदशतिथ्यात्मके २शुक्ले पक्षे पु० ।

**धवलपटिका** स्त्री कर्म० । श्वेतपाटलिकायाम् राजनि० ।

**धवलमृत्तिका** स्त्री कर्म० । (खड़ि) खटिन्यां राजनि० ।

**धवलयावनाल** पु० कर्म० । श्वेतयावनाले यावनालभेदे राजनि० ।

**धवला** स्त्री अनुदात्तत्वात् ङीप् । शुभ्रवर्णायां स्त्रियाम् । अमरः । [धवलिमभिः धूलपाशैरभिख्याम्” माघः ।

**धवलिमन्** पु० धवलस्य भावः इमनिच् । श्वेतत्वे “अधिगत-

**धवलोत्पल** न० कर्म० । कुमुदे राजनि० ।

**धवाणक** पु० धुनोति इत्यादौ धू—आणक । वायौ उज्ज्वल० ।

**धवित्र** न० धू—करणे इत्र । मृगचर्मनिर्मितव्यजने अमरः । “सुधवित्रं धवित्रलक्षि परिशीक्ष” कात्या०श्रौ०२६।२।१० । “धुनोत्येभिरिति धवित्राणि कृष्णाजिनखण्डनिर्मितास्तेषां व्यजनाः” देवयाज्ञः ।

**धस्** त्रि० धा—कसुन् । १धारके रेतोधाः पुरोधाः । २अङ्गिरसि पु० मेदि० । ३इहस्पतौ उणा० ।

**धा** धारणे पोषणे दाने च जुहो० उभ० सक० अनिट् । दधाति धत्ते धत्से दध्यात् दधातु धेहि अदधात् अधत्त । अधात् अधित । दधौ दधे । दधिथ दधाथ । दधिव धाता धास्यति । धीयते अधायि अधायिषाताम् अधिषाताम् । हितः हित्वा हितिः । “त्वं मुग्धाक्षि ! विनैव कञ्चुलिकया धत्से मनोहारिणीम्” सा० द० । “इमं नो यज्ञममृतेषु धेहि” ऋ० ३।२१।१ “तत्र त्वा देवाः सविता दधातु” ऋ० १०।१७।४ “धर्मे दध्यात् सदा मनः” मनुः । “निवेशाय मनो दधुः” भा० व० ६५ अ० । “न नाशमधिगच्छेयुरिति मे धीयते मतिः” भा० विरा० २८ अ० । “हिंस्राहिंस्रे मृदुक्रूरे धर्माधर्मावृतानृते । यद्यस्य सोऽदधात् सर्गे तत्तस्य स्वयमाविशत्” मनुः । “यस्यापमानमपनयस्य शेषं धत्तेऽन्यदुर्वहम्” भट्टिः । “नामधास्यत् कथं नागो मृणालमृदुभिः फणैः” कुमा० धापयति धित्सति । “स्वं वज्रं कुह धित्सथः” ऋ० १।४६।९

अति+अतिक्रम्य धारणे अतिशयधारणे च “आयुर्यत्ते अतिहितं पराचैः” अथ० ७।५३।३ ।

अधि+आधिक्येन धारणे “यत्रार्यदाय सवो अध्यधत्तम्” ऋ० १।११७।८ ।

अनु+पश्चाद्धारणे । “अथान्यान् (तण्डुलान्) कृतास्वाग्नीषु समित्सु अनुदधीरन्” लाट्या० ४।९।१४ ।

अन्तर्+आच्छादने वस्त्वन्तरेण व्यवधाने । “उदुम्बरशाखामन्तर्धायाभिषिञ्चति” ऐ० ब्रा० ८।७ । तिरोधाने “ते चान्तर्दधिरे नागाः” भा० आ० १२९ अ० ।

अपि+तिरोधाने आच्छादने । “धनेनाधर्मलब्धेन यच्छिद्रमपिधीयते” भा० उ०३४अ० । वा अतो लोपः “पिधानमपिधानम्” अमरः ।

अभि+कथने “साक्षात् सङ्केतितं योऽर्थमभिधत्ते स वाचकः” का० प्र० । “गणनव्यवहारे तु हेतुः संख्याभिधीयते” भाषा० ।

प्रति+अभि+प्रत्युत्तरकथने । “मया च प्रत्यभिहितं देवकार्यादर्शनात्” भा० व० १९ अ० ।

अव+मनःसंयोगविशेषे अभिनिवेशे “अवधानपरे चकार सा” कुमा० । अधःस्थापने पातने च “यां ते कृत्यां कूपे अवदधुः” अथ० ५।३१।७ । “त्रितः कूपेऽवहितः” ऋ० १।१०५।१७